# Kalyanikamalavratanirupanam

# कल्याणीकमलाव्रतनिरूपणम्

## Document Information

Text title : Kalyanikamalavratanirupanam

File name : kalyANIkamalAvratanirUpaNam.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 138/76-104||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 12, 2026

*sanskritdocuments.org*

# कल्याणीकमलाव्रतनिरूपणम्

अथाऽन्यत्ते शुभं लक्ष्मि कल्याणीकमलाव्रतम् ।
अशेषयज्ञफलदमशेषाघविनाशनम् ॥ ७६ ॥

अशेषदुष्टशमनमशेषसुरपूजितम् ।
पवित्राणां पवित्रं च मङ्गलानां सुमङ्गलम् ॥ ७७ ॥

दैवतं दैवतानां च पुराणानां पुरातनम् ।
माघशुक्लैकादशिकाव्रतं कल्याणदं शुभम् ॥ ७८ ॥

घृतेनाऽभ्यञ्जनं कृत्वा दशम्यां च तिलैर्जलैः ।
स्नात्वा प्रातर्हरिकृष्णं पूजयेत् सर्ववस्तुभिः ॥ ७९ ॥

नमोऽनादिकृष्णनारायणाय पादयोर्नमः ।
सर्वात्मने नमः के च वैकुण्ठाय नमो मुखे ॥ ८० ॥

श्रीवत्सधारिणे वक्षःस्थले नमो मुहुर्मुहुः ।
शङ्खचक्रगदापद्मवरदानप्रधारिणे ॥ ८१ ॥

नमो बाहुषु सर्वेषूदरे दामोदराय च ।
मेढ्रे नमः सुखदाय ऊर्वोः सौभाग्यदाय च ॥ ८२ ॥

जान्वोर्नमो भूतधाय जङ्घयोर्मोक्षदाय च ।
पादयोः पापनाशाय श्रीकृष्णाय नमो नमः ॥ ८३ ॥

नमः कल्याणकारिण्यै कमलायै नमो नमः ।
नमः श्रीललितालक्ष्म्यै जयालक्ष्म्यै नमो नमः ॥ ८४ ॥

नमः श्रीमाणिकीलक्ष्म्यै नारायणीश्रियै नमः ।
नमः श्रीसुखदालक्ष्म्यै शिवराज्ञीश्रियै नमः ॥ ८५ ॥

नमः श्रीपार्वतीलक्ष्म्यै कान्ताप्रमाश्रियै नमः ।
नमः श्रीकम्भरालक्ष्म्यै महालक्ष्मीश्रियै नमः ॥ ८६ ॥

नमः श्रीसन्तुष्टिलक्ष्म्यै कार्ष्णीश्रियै नमो नमः ।
नमः श्रीराधिकालक्ष्म्यै रमालक्ष्म्यै नमो नमः ॥ ८७॥

एवं नत्वा च गोविन्दं श्रियं नत्वा पुनः पुनः ।
सर्वोपचारकैश्चोभौ कल्याणदौ प्रपूजयेत् ॥ ८८॥

गन्धैर्माल्यैर्धूपदीपैर्भक्ष्यैर्नानाविधैरपि ।
जलैस्ताम्बूलकैश्चारार्त्रिकैः पुष्पार्पणैस्तथा ॥ ८९॥

प्रीयतां मम गोपालः श्रीपतिः पुरुषोत्तमः ।
प्रीयतां मम कल्याणीमहालक्ष्मीनरायणी ॥ ९०॥

एवमुच्चार्य शयने स्थापयेत् परमेश्वरीम् ।
मध्याह्ने पूजयेच्चापि भोजयेच्च निशामुखे ॥ ९१॥

सोत्सवं पूजयेच्चापि भोजयेत् पायसादिकम् ।
सुप्त्वा चैकादशीप्रातरुत्थाय स्नानमाचरेत् ॥ ९२॥

पूजयेद्विधिना लक्ष्मीं कल्याणीं मण्डपे शुभे ।
सर्वतोभद्रके रम्ये मण्डले विष्णुना सह ॥ ९३॥

पूजयित्वा च गोदाने शय्यादानं घटार्पणम् ।
लक्ष्म्यर्पणं रत्नभूषाम्बरपात्रधनार्पणम् ॥ ९४॥

धान्यभोजनभोग्याद्यर्पणं कुर्याद्व्रती प्रगे ।
भोजयेच्छ्रीमहालक्ष्मीं दुग्धं फलादिकं शुभम् ॥ ९५॥

मध्याह्ने पूजयेच्चापि भोजयेत् पायसादिकम् ।
सायं सम्पूजयेच्चापि रात्रौ जागरणं चरेत् ॥ ९६॥

द्वादश्यां प्रातरेवाऽपि प्रपूज्य विधिना दिशेत् ।
गुरवे साधवे साध्व्यै दानानि च द्विजातये ॥ ९७॥

भोजयेत्सुमृष्टमिष्टान्नानि विप्रान् सतस्तथा ।
बालकान् बालिका नारीः साधून् सम्भोजयेत्तथा ॥ ९८॥

दद्याद्दानानि बहूनि परिहारं ततश्चरेत् ।
लक्ष्मीनारायणसंहितायाः कथामिमां वदेत् ॥ ९९॥

पठनाच्छ्रवणादस्य स्मरणाच्चानुमोदनात् ।
भुक्तिर्मुक्तिर्भवेच्चापि कल्याणानि बहूनि च ॥ १००॥

पुराजन्मनि चाभीरीकन्या कल्याणिनीव्रतम् ।
कृत्वा नारायणपुत्री ऊर्वशी समजायत ॥ १०१॥

पुरा वैश्यकुटुम्बोत्था पुलोमकन्यका त्विदम् ।
व्रतं कृत्वा महेन्द्राणी व्यजायत दिवेश्वरी ॥ १०२॥

पुरा कृत्वा व्रतं चैतत् सुरपुत्रो द्विजस्ततः ।
सूर्यो बभूव स्वर्गेशः सहस्ररश्मिवान् प्रभुः ॥ १०३॥

तस्मात् कल्याणिकालक्ष्मीव्रतं स्वेष्टोत्तमप्रदम् ।
माघे दिनत्रयं कार्यं सर्वकल्याणसम्प्रदम् ॥ १०४॥

इति श्रीलक्ष्मीनारायणीयसंहितायाः द्वापरयुगसन्तानात्मकस्य तृतीयखण्डे १३८-अध्यायान्तर्गतं कल्याणीकमलाव्रतनिरूपणं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड ३। अध्याय १३८/७६-१०४॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 138/76-104..

Proofread by PSA Easwaran

*Kalyanikamalavratanirupanam*

pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*